कक्षा – X

अभ्यासकार्यपत्रकम्

(सङ्कलनात्मकं मूल्याङ्कनम्)

(प्रथमसत्रम्)

समयः होरात्रयम् पूर्णाङ्काः 90

निर्देषाः

(i) प्रष्नपत्रे चत्वारः खण्डाः सन्ति।

खण्डः (क) अपठित–अवबोधनम् – 10 अंकाः

खण्डः (ख) रचनात्मकं कार्यम् – 15 अंकाः

खण्डः (ग) अनुप्रयुक्तव्याकरणम् – 30 अंकाः

खण्डः (घ) पठित–अवबोधनम् – 35 अंकाः

(ii) सर्वे प्रष्नाः अनिवार्याः।

(iii) प्रष्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि ।

(iv) प्रष्नसंख्या अवष्यं लेखनीया।

(v) उत्तराणि सस्कृतेन एव लेखनीयानि ।

खण्डः (क )

अपठित – अवबोधनम् 12 अंकाः

1. अधोलिखितं अनुच्छेदं पठित्वा निर्देषानुसारं अनुच्छेदाधारितानां प्रष्नानाम् उत्तराणि लिखत–

देषभक्तिः पराजिता जाता । हल्दीघाटी युद्धं समाप्तं अभवत् । मेवाडाधिपतिः महाराणाप्रतापः पराजितः जातः । सम्पूर्णरूपेण संकटमापतितम्। मेवाडाधिपतिः महाराणाप्रतापः अरण्ये कतिपयैः विष्वासपात्रैः भटैः सह संकटापन्ने काले विचारमग्नः षिलायाम् उपविष्टः अस्ति। स्वदेषस्य रक्षायै युध्यमानस्य तस्य बहूनि वर्षाणि व्यतीतानि । हन्त! वराकस्य पार्ष्वे सेनायाः भोजनसामग्र्याः च अभावः विद्यते।अधुना तु सः स्वकीयैः प्राणेरैव स्वदेषं स्वतंत्रं कर्तुम् इच्छति । किन्तु महादानी भामाषाहस्य सहयोगेन विजयतां स्वदेषः इति भावेन च सः पुनः युद्धं कृत्वा स्वदेषं स्वतंत्रं कृतवान्। सत्यमेवोक्तम् – वीरभोग्या वसुन्धरा

**I.** एकपदेन उत्तरत– 1/2X4=2

(i) स्वदेषं कः स्वतंत्रं कर्तुम् इच्छति ?

(ii) का पराजिता जाता ?

(iii) महाराणाप्रतापः कुत्र उपविष्टः अस्ति ?

(iv) वीरभोग्या का ?

**II.** पूर्णवाक्येन उत्तरत– 1X2=2

(i) कस्य पार्ष्वे सेनायाः भोजनसामग्र्याः च अभावः विद्यते ?

(ii) महाराणाप्रतापः कैः सह विचारमग्नः उपविष्टः अस्ति ?

**III.** निर्देषानुसारं प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत – **1X4=4**

(i) मेवाडाधिपतिः पदं कस्य विषेषणपदम् ?
(अ) भटस्य (ब) प्रतापस्य (स) वराहस्य (द) वसुन्धरायाः

(ii) हन्त ! पदे का विभक्तिः ?
(अ) द्वितीया (ब) तृतीया (स) प्रथमा (द) सम्बोधन

(iii) 'इच्छति' इति क्रियापदस्य किं कर्तृपदं अनुच्छेदे प्रयुक्तम् ?
(अ) सः (ब) सह (स) युद्धं (द) स्वदेषं

(iv) भावः इत्यस्य किं विलोमपदं अनुच्छेदे प्रयुक्तम् ?
(अ) विभावः (ब) प्रभावः (स) अभावः (द) स्वभावः .

**Iv.** **अस्य गद्यांषस्य समुचितं षीर्षकं किम् ?** **2**
(अ) देषभक्तिः पराजिता (ब) विजयतां स्वदेषः (स) स्वतंत्रतादिवसः (द) जयहिन्दः

## खण्डः (ख )
## रचनात्मकं कार्यम्

**2.** **संगणककक्षायां प्रवेषं प्राप्तुं प्रधानाचार्यं प्रति एकं प्रार्थनापत्रं । लिखिते प्रार्थनापत्रे रिक्तस्थानानि उचितपदैः पूरयत्–** **2X10=5**

देववाणी भवनम्

तिथिः ..............................

आदरणीयाः प्रधानाचार्यवर्याः

................................... ,

सविनयं निवेदयामि यत् अहं ...................... कक्षायां 90 प्रतिषतअंकान् ............................उत्तीर्णः जातः । अधुना अहं .................................. प्रवेष्टुम् इच्छामि । गणितविषये तु ................................ सर्वदा षतप्रतिषतम् ....................गृह्यन्ते । अद्यत्वे सर्वेषु कार्येषु ............................ अनिवार्यम् । कृपया महम् ....................... प्रदाय ................................माम् अनुगृह्णन्तु । ...................................................

प्रार्थी

अ. ब. स.

**मंजूषा–**

| |
|---|
| सधन्यवादम्, स्वीकृतिं, अंकाः, संगणककक्षायां, दषम, मया, संगणकम्, भवन्तः, गृहीत्वा, मान्याः |

3. मंजूषायां प्रदत्त–षब्दानां सहायतया चित्रं दृष्ट्वा पंच वाक्यानि संस्कृतेन लिखत्–**2X5=10**



मंजूषा–

| |
|---|
| चटका, गमय, पुष्पाणि, प्रणमतः, गृहाणि, सूर्योदयः, विकसन्ति, ज्योतिः, बालिका, वृक्षौ |

**अथवा**

**स्वविद्यालये भवता/भवत्या प्रथमवारं प्रार्थनासभायाः पूर्णतः संस्कृतेन आयोजनं कृतम् । स्वमनोदषां वर्णयन् पंच वाक्यानि संस्कृतेन मंजूषापदसहायतया लिखतु ।**

**मंजूषा –**

| |
|---|
| मार्गदर्षनेन, चित्तं, व्याकुलं, कम्पेते, अतीव, साधु, आमविष्वासः, जागृतः, करतलध्वनिं, प्रसन्नौ, आदेषेन |

कक्षा – X
अभ्यासकार्यपत्रकम् – 2
(सड.कलनात्मकं मूल्याड.कनम्)
(प्रथमसत्रम्)

समयः .................. पूर्णाड.काः .......

निर्देषाः

(ii) सर्वे प्रष्नाः अनिवार्याः।
(iii) प्रष्नानाम् उत्तराणि क्रमेणैव लेखनीयानि ।
(iv) प्रष्नसंख्या अवष्यं लेखनीया।
(v) उत्तराणि सस्कृतेन एव लेखनीयानि ।

खण्डः (ग)
अनुप्रयुक्त व्याकरणम्

4. अधोलिखितेषु वाक्येषु रेखांकित पदानां संधिं विच्छेदं वा कुरुत् – 1X5=5

(i) विद्यालयः भवनम् विषालः अस्ति ।
(अ) विद्या + आलयः (ब) विद्या + लयः (स) विद्यालय + अः (द) विद्य + अलयः
(ii) तत् + षरेण वृक्षः छिन्नः अभवत्।
(अ) तत्छरेण (ब) तच्छरेण (स) तच्षरेण (द) तत्षरेण
(iii) सूर्योदये सूर्यार्घ्यं दातव्यम् ।
(अ) सूर्योदय + ए (ब) सूर्यो + दये (स) सूर्य + दये (द) सूर्य + उदये
(iv) धेनुः तृणं + चरति ।
(अ) तृण´चरति (ब) तृणष्चरति (स) तृणमचरति (द) तृणंचरति
(v) देवेन्द्रः षक्रः तत्रागच्छत् ।
(अ) देवे + न्द्रः (ब) दे + वेन्द्रः (स) देव + इन्द्रः (द) देव + एन्द्रः

5. अधोलिखितेषु वाक्येषु रेखांकित पदानां समासं विग्रहं वा प्रदत्त–विकल्पेभ्यः चित्वा लिखत्

(i) वानरयूथपतिः अचिन्तयत्
(अ) वानर यूथपतिः (ब) वानरयूथ पतिः (स) वानरस्ययूथ पतिः (द) वानरयूथस्य पतिः .
(ii) रामः पंचानाम् पटानाम् समाहारः इति स्थाने अवसत् ।
(अ) पंचवटः (ब) ) पंचवटम् (स) पंचवटी (द) पंचवटिन
(iii) राजपुत्रः राजभवने निवसति ।
(अ) राजायाः पुत्रः (ब) राज्ञः पुत्रः (स) राजस्य पुत्रः (द) राज्ञस्य पुत्रः
(iv) सरोवरे नीलानि कमलानि षोभन्ते।
(अ) नीलकमलाः (ब) ) नीलकमलानि (स) ) नीलकमलम् (द) नीलकमलम
(iv) अहं सर्वं क्रियायाः कलापं पष्यामि ।
(अ) क्रियालापं (ब) क्रियालापम् (स) क्रियाकलापं (द) कृतालापानि
(iv) विचित्रस्वप्नः मया दृष्टः ।
(अ) विचित्रः स्वप्नः (ब) ) विचित्र स्वप्नः (स) ) विचित्राणि स्वप्नः (द) ) विचित्राः स्वप्नः

6. **अधोलिखितेषु वाक्येषु रेखांकित पदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितं उत्तरं**
. **प्रदत्त–विकल्पेभ्यः चित्वा उत्तरपुस्तिकायां लिखत् –** **1X5=5**

(i) श्रद्धावान् छात्रः लभते ज्ञानम् ।
(अ) श्रद्धा + मतुप् (ब) ) श्रद्धा + मतूप (स) श्रद्धा + वान् (द) श्रद्धा + आवान्

(ii) धनी दानेन षोभते ।
(अ) धन + ई (ब) धन + इन् (स) धन + ईनी (द) धन + नी

(iii) सरलसंस्कृतेन व्यवहारः करणीयः ।
(अ)कर + णीयः (ब) कृ + नीयः (स) कृ + अनीयर् (द) करण + ईयः

(iv) मानवः सामाज + ठक् प्राणी अस्ति ।
(अ)सामाजिकी (ब) समाजिक (स) सामाजिकः (द) सामाजिक

(v) मांसाहारं न कृ + अनीयर्
(अ) करणीया (ब) करणीयः (स) करणम् (द) करणीयम्

7. **प्रदत्तविकल्पेभ्यः उचितं अव्ययपदं चित्वा वाक्येषु पूरयत्** **1X5=5**

(i) मम विद्यालये संस्कृतनाटकं .................. भवति ।
(अ) अपि (ब) ) इव (स) ) विगत (द) अन्यत्र

(ii) स ............न आगतः।
(अ) ऐव (ब) तत्र (स) अति (द) एव

(iii) ............तक्षषिलायां आचार्यः चाणक्यः आसीत् ।
(अ) प्रथम् (ब) ) पुरा (स) ) विगत (द) पुरा

(iv) स ............परिश्रमं न करोति।
(अ) वृथा (ब) पृथा (स) इव (द) उच्च

(v) ज्ञानं .................. सुखं न भवति ।
(अ) वृथा (ब) पृथा (स) विना (द) बिना

8. **अधोलिखितसंवादे रिक्तस्थानानि वाच्यानुसारं पूरयत्** **1X5=5**

राकेषः – प्रातःकाले भवान् किं करोति ?
राजेषः – मया पाठः .........................
राकेषः – किं भ्रमणाय न गच्छति ?
राजेषः – न .................. भ्रमणाय न गम्यते ।
राकेषः – किं भवान् नित्यं व्यायामं अपि करोति ?
राजेषः – आम् ! मया नित्यं व्यायामं .........................।
राकेषः – किं प्रातः मातरम् प्रणमति ?
राजेषः – आम् ! मया ........................ ।
राकेषः – किं रात्रौ दूरदर्षनं पष्यति ?
राजेषः – न ! मया दूरदर्षनं न ...................

मंजूषा–

| |
|---|
| प्रणम्यते मया, पठ्यते, क्रियते, दृष्यते |

9. तव मित्रं कदा किं कार्यं करोति इति अंकेषु दत्तं समयं संस्कृतषब्दैः लिखत – 1X4=4

सः प्रातः 5.00 वादने उत्तिष्ठति ।
ततः 7.30 वादने विद्यालयं गच्छति ।
अपराह्णे 3.15 वादने गृहम् आगच्छति ।
रात्रौ 9.45 वादने स्वपिति ।

**कक्षा – X**
**अभ्यासकार्यपत्रकम् – 3**

**(सङ्कलनात्मकं मूल्याङ्कनम्)**
**(प्रथमसत्रम्)**

**समयः ...............** **पूर्णाङ्काः .........**

**निर्देषाः**

- **(ii) सर्वे प्रष्नाः अनिवार्याः।**
- **(iii) प्रष्नानाम् उत्तराणि क्रमेणैव लेखनीयानि ।**
- **(iv) प्रष्नसंख्या अवष्यं लेखनीया।**
- **(v) उत्तराणि सस्कृतेन एव लेखनीयानि ।**

**खण्डः (घ)**
**पठित – अवबोधनम्**

**10. अधोलिखितं गद्यांषं , पद्यांषं नाट्यांषं च पठित्वा प्रदत्त प्रष्नानां उत्तराणि लिखत् –**
**(अ) गद्यांषं**

राज्ञि एवं विचारयति सति तस्य दानषीलतां परीक्षितुं देवाधिपतिः षक्रः नेत्रहीनयाचकस्य रूपं धारयित्वा तत्पुरतः अवदत् – हे राजन् ! भवतः दानवीरतां आकर्ण्य आषान्वितः भवत्समीपम् आगतोऽस्मि। देव ! रवि – षषि – तारा – मण्डलभूषितं जगत् एतत् कथमिव पष्येयम् चक्षुर्हीनः। राजा उवाच – भगवन् ! भवन्मनोरथं पूरयित्वा आत्मानम् अनुगृहीतुं कर्तुम् इच्छामि ।

**प्रष्नाः –**

**I. एकपदेन उत्तरत–** **1/2X2=1**

(i) दानषीलतां परीक्षितुं कः अगच्छत् ?
(ii) देवाधिपतिः किम् धारयित्वा तत्पुरतः गत्वा अवदत् ?

**II. पूर्णवाक्येन उत्तरत–** **2**

देवाधिपतिः किम् अवदत् ?

**II.** **यथानिर्देषं विकल्पेभ्यः चित्वा उत्तरत–** **1X2=2**

(i) षक्रः इति पदस्य किं विषेषणपदं प्रयुक्तम् ?

(अ) मण्डलभूषितं (ब) ) देव (स) ) देवाधिपतिः (द) अधिपतिः

(ii) 'अवदत्' इति पदस्य कृते किं कर्तृपदं प्रयुक्तम् ?

(अ) षक्रः (ब) ) देव (स) ) रवि (द) अधिपतिः

**(आ) पद्यांष –**

अपूर्वः कोऽपि कोषोऽयं विद्यते तव भारति!
व्ययतो वृद्धिमायाति क्षयमायाति संचयात् ।।

**प्रष्नाः –**

**I.** **एकपदेन उत्तरत् –** **1/2X2=1**

(i) विद्यायाः कोषः कीदृषः ?

(ii) व्ययतो का वृद्धिमायाति ?

**II.** **पूर्णवाक्येन उत्तरत् –** **2**

संचयात् किं क्षयमायाति ?

**III.** **यथानिर्देषं उत्तरत् –** **1X2=2**

(i) अस्मिन् ष्लोके 'इदम्' इति सर्वनामपदस्य किं रूपं प्रयुक्तमति ?

(अ) अस्मिन् (ब) कोपि (स) तव (द) अयं

(ii) अस्मिन् ष्लोके प्रयुक्त संचयात् पदे का विभक्तिः ?

(अ) सप्तमी (ब) तृतीया (स) पंचमी (द) द्वितीया

**(इ) नाट्यांष –**

संगीता – अमूल्यः एषः पुस्तकानां संग्रहः ।
रविः – सगीते! अयम् अस्माकं विद्यालयस्य पुस्तकालयः ।
संगीता – अहो! अत्र तु ग्रन्थचक्रिका अपि अस्ति ।
रविः – आम् । अस्यां ग्रन्थचक्रिकायाम् अनेके संस्कृतग्रन्थाः स्थापिताः ।
संगीता – (पठित्वा) वेदाः, रामायणं, महाभारतम् । कथमत्र गीता तु न दृष्यते ।
रविः – अयि! गीता तु महाभारतस्य एव अंषः ।
संगीता – आम् । स्मरामि ।

**प्रष्नाः –**

**I.** **एकपदेन उत्तरत–** **1/2X2=1**

(i) गीता कस्य अंषः ?

(ii) अमूल्यः केषां संग्रहः ?

**II.** **पूर्णवाक्येन उत्तरत–** **2**

ग्रन्थचक्रिकायाम् के के संस्कृतग्रन्थाः स्थापिताः ?

**III. यथानिर्देषं विकल्पेभ्यः चित्वा उत्तरत–** **1X2=2**

(i) ' दृष्यते ' इतिक्रियापदस्य कर्तृपदं किम् ?

(अ) वेदाः, (ब) रामायणं, (स) महाभारतम् (द) गीता

(ii) 'न' इत्यस्य किं विलोमपदं अनुच्छेदे प्रयुक्तम् ?

(अ) आम् (ब) ष्अहो (स) अयि (द) एव

**11. अधोलिखितष्लोकयोः भावार्थं मंजूषातः समुचितपदानि चित्वा पूरयत् –** **1X4=4**

(क) कोऽनर्थफलः ? मानः, का सुखदा ? साधुजनमैत्री।
सर्वव्यसनविनाषे को दक्षः ? सर्वथा त्यागी ।।

**भावार्थः –**

यस्य फलम् अनर्थः एव सः (1)................................ । का सर्वदा सुखं ददाति ? सज्जनानां (2).......................... । कः सर्वाः विपदः नाषयितुं चतुरः ? यः सर्वप्रकारेण त्यागी भवति ।

(ख) असंषयं महाबाहो ! मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय , वैराग्येण च गृह्यते ।।

**भावार्थः –**

महाबाहो अर्जुन ! (1)..........................निस्सन्देहं चंचलम् अस्ति । अस्य उपरि नियंत्रणं कठिनं परन्तु इदं वैराग्येण (2)..........................च वषे आयाति ।

**मंजूषा –**

| |
|---|
| मानः , अभ्यासेन , मैत्री , मनः |

**12. निम्नलिखितष्लोकस्य अन्वयं पुरयत ।** **1X4=4**

(क) नास्ति विद्यासमं चक्षुः, नास्ति सत्यसमं तपः ।
नास्ति रागसमं दुःखं , नास्ति त्यागसमं सुखम् ।।

**अन्वयः –**

विद्यासमं (1)...................... न अस्ति , सत्यसमं (2)....................... न अस्ति , रागसमं दुःखं न (3)......................... , त्यागसमं (4).......................... न अस्ति ।

**13. अधोलिखितवाक्येषु रेखांकितपदानां स्थाने विकल्पेभ्यः उचितं प्रष्नवाचकपदं प्रयुज्य प्रष्ननिर्माणं कुरुत् –** **1X4=4**

(i) <u>षिष्यः</u> आचार्यात् पादम् आदत्ते ।

(अ) कस्य (ब) ष्कुत्रतः (स) कस्मात् (द) कः

(ii) <u>विद्यया</u> समं चक्षुः नास्ति ।

(अ) कया (ब) ष्कस्य (स) कस्मात् (द) का

(iii) दग्धाः मे घोटकाः ।

(अ) कस्य (ब) ष्कस्याः (स) के (द) कथं

(iv) कामात् क्रोधः अभिजायते ।

(अ) कस्य (ब) ष्कुत्रतः (स) कस्मात् (द) कथं

**14. अधोलिखितवाक्यानि घटनाक्रमेण पुनः लेखनीयानि –** **1/2X8=4**

(i) एतेषां कलहो न वानराणां हिताय ।

(ii) ते च सूपकाराः तम् आषु ताडयन्ति स्म ।

(iii) नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म ।

(iv) राजपुत्राः प्रासादे वानरैः क्रीडन्ति स्म ।

(v) यूथपतेः वचनम् अप्रियं मत्वा कपयः प्राहसत् ।

(vi) एषः कलहः नूनं भवतां विनाषकारणं भविष्यति ।

(vii) अष्वाः प्राणत्राणाय इतस्ततः अधावन् ।

(viii) सर्वे कपयः भयत्रस्ताः अभवन् ।

**15. रेखांकितपदानां प्रसंगानुसारं उचितम् अर्थं चिनुत् –** **1X4=4**

1. तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ?

(अ) देयम् (ब) ग्राह्यम् (स) कठिनम् *(द)* अदेयम्

2. कार्पण्यनिष्चित मतेः कः स्यात् पापतरस्ततः ।

(अ) बुद्धया (ब) बुद्धयात् (स) षुद्धया *(द)* बुद्धिया

3. कोऽन्धः ? योऽकार्य रतः ?

(अ) अलीनः (ब) कुलीनः (स) लीनः *(द)* अलिप्तः

4. अपुर्वः कोऽपि कोषोऽयं विते तव भारति ।

(अ) लक्ष्मी (ब) सरस्वती (स)काली *(द)* दुर्गा